শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে দ্বাৎরিংশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে দ্বাৱিংশং দশকম্॥

## অজামিলোপাখ্যানম্

অজামিলো নাম মহীসুরঃ পুরা
    চরন্ ৱিভো ধর্মপথান্ গৃহাশ্রমী।
গুরোর্গিরা কাননমেত্য দৃষ্টৱান্
    সুধৃষ্টশীলাং কুলটাং মদাকুলাম্॥ **22.1** ॥

স্বতঃ প্রশান্তোঽপি তদাহৃতাশযঃ
    স্বধর্মমুৎসৃজ্য তযা সমারমন্।
অধর্মকারী দশমী ভৱন্ পুন -
    র্দধৌ ভৱন্নামযুতে সুতে রতিম্॥ **22.2** ॥

স মৃত্যুকালে যমরাজকিঙ্করান্
    ভযঙ্করাংস্ত্রীনভিলক্ষযন্ ভিযা।
পুরা মনাক্ ৎৱৎস্মৃতিৱাসনাবলা -
    জ্জুহাৱ নারাযণনামকং সুতম্॥ **22.3** ॥

দুরাশযস্যাপি তদাৎৱনির্গত -
    ৎৱদীযনামাক্ষরমাত্রৱৈভৱাৎ।
পুরোঽভিপেতুর্ভৱদীযপার্ষদা -
    শ্চতুর্ভুজাঃ পীতপটা মনোরমাঃ॥ **22.4** ॥

অমুং চ সম্পাশ্য ৱিকর্ষতো ভটান্
    ৱিমুঞ্চতেত্যারুরুধুর্বলাদমী।

নিৱারিতাস্তে চ ভৱজ্জনৈস্তদা
তদীযপাপং নিখিলং ন্যৱেদযন্॥ **22.5**॥

ভৱন্তু পাপানি কথং তু নিষ্কৃতে
কৃতেঽপি ভো দণ্ডনমস্তি পণ্ডিতাঃ।
ন নিষ্কৃতিঃ কিং ৱিদিতা ভৱাদৃশা -
মিতি প্রভো ৎৱৎপুরুষা বভাষিরে॥ **22.6**॥

শ্রুতিস্মৃতিভ্যাং ৱিহিতা ৱ্রতাদযঃ
পুনন্তি পাপং ন লুনন্তি ৱাসনাম্।
অনন্তসেৱা তু নিকৃন্ততি দ্ৱযী -
মিতি প্রভো ৎৱৎপুরুষা বভাষিরে॥ **22.7**॥

অনেন ভো জন্মসহস্রকোটিভিঃ
কৃতেষু পাপেষ্ৱপি নিষ্কৃতিঃ কৃতা।
যদগ্রহীন্নাম ভযাকুলো হরে -
রিতি প্রভো ৎৱৎপুরুষা বভাষিরে॥ **22.8**॥

নৃণামবুদ্ধ্যাপি মুকুন্দকীর্তনং
দহত্যঘৌঘান্ মহিমাস্য তাদৃশঃ।
যথাগ্নিরেধাংসি যথৌষধং গদা -
নিতি প্রভো ৎৱৎপুরুষা বভাষিরে॥ **22.9**॥

ইতীরিতৈর্যাম্যভটৈরপাসৃতে
ভৱদ্ভটানাং চ গণে তিরোহিতে।
ভৱৎস্মৃতিং কঞ্চন কালমাচরন্
ভৱৎপদং প্রাপি ভৱদ্ভটৈরসৌ॥ **22.10**॥

স্ৱকিঙ্করাৱেদনশঙ্কিতো যম -
স্ত্ৱদঙ্ঘ্রিভক্তেষু ন গম্যতামিতি।

স্বকীযভৃত্যানশিশিক্ষদুচ্চকৈঃ
    স দেৱ ৱাতালযনাথ পাহি মাম্॥ **22.11**॥

॥ ইতি শ্ৰীমন্নারাযণীযে দ্বাৱিংশং দশকং সমাপ্তম্॥